विंशः पाठः

# चतस्रः विद्याः

**आचार्यो विष्णुगुप्तचाणक्यः चन्द्रगुप्तस्य अमात्यः आसीत्। सः महान् कूटनीतिज्ञः राजनीतिज्ञः अर्थशास्त्रज्ञः धर्मज्ञश्चासीत्। तेन अनेके ग्रन्थाः विरचिताः। तेषु अर्थशास्त्रस्य महत्त्वं सर्वाधिकमस्ति। साम्प्रतिके कालेऽपि तस्य ग्रन्थस्य उपयोगिता प्रासङ्गिकी एव वर्तते। पाठेऽस्मिन् विद्यायाः वर्गीकरणं लक्षणञ्च छात्राणां ज्ञानवर्धनाय प्रस्तुतमस्ति।**

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः। त्रयी वार्ता दण्डनीतिश्चेति मानवाः। चतस्रः एव विद्याः इति कौटिल्यः। ताभिः धर्माधर्मौ यद्विद्यात् तद् विद्यानां विद्यात्वम्। साङ्ख्यं योगो लौकायतं चेत्यान्वीक्षिकी। धर्माधर्मौ त्रय्याम्। बलाबले चैतासां हेतुभिरन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥**

सामर्ग्यजुर्वेदास्त्रयी। अथर्ववेदश्च । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि। कृषिपाशुपाल्ये वाणिज्या च वार्ता।

**धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी।**
**तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्यां॥**

आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधको दण्डः। तस्य नीतिर्दण्डनीतिः। अलब्धलाभार्था लब्धपरिरक्षिणी रक्षितविवर्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायता लोकयात्रा। तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात्। न ह्येवंविध वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः। नेति कौटिल्यः। तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते। यथार्हदण्डः पूज्यः। सुविज्ञातप्रणीतो हि दण्डः प्रजाः धर्मार्थकामैर्योजयति।

अप्रणीतो हि मात्स्यन्यायमुद्भावयति। बलीयानबलं हि ग्रसते दण्डधराभावे। तेन गुप्तः प्रभवतीति।

**चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।**
**स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु॥**

तस्माद्दण्डमूलास्तिस्रो विद्याः। विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः।

## शब्दार्थ:

आन्वीक्षिकी - शास्त्रविशेष: यस्मिन् अन्वीक्षया अध्यापनं भवति इति आन्वीक्षिकी। त्रयी - ऋक्यजु:साम त्रयाणां वेदानां समूह:। वार्ता - व्यापार:। मानवा: - मनुस्मृतेश्च अनुयायिन:। लोकायतम् - चार्वाकमतम्। धर्म: - सदाचारविचार:। अधर्म: - असदाचारविचार:। अर्थ: - सम्यक् साधनात् अर्जितं धनम् । अनर्थ: - अनुचितसाधनात् अर्जितं धनम्। व्यसने - सङ्कटकाले। हेतुभि: - युक्तिभि:, उपायै:। अभ्युदये - उन्नत्याम्। अवस्थापयति - स्थिरं करोति। प्रज्ञा - बुद्धि:, मेधा। वैशारद्यम् - नैपुण्यम्। प्रदीप: - प्रकृष्ट: दीप:। शाश्वतम् - नित्यम्। शिक्षा - वर्णानां शुद्धोच्चारण विधिशास्त्रम्। कल्प: - यज्ञविधानशास्त्रम्। व्याकरणम् - शुद्धशुद्धशब्दानां पृथक्करणशास्त्रम्। निरुक्त - वैदिकशब्दानां निर्वचनशास्त्रम्। छन्दोविचिति: - छन्द: शास्त्रम्। वाणिज्यम् - व्यापारकर्म। हिरण्यम् - स्वर्णम्। कुप्यम् - अपधातु:। विष्टि: - कला, कर्मकौशलम्। औपकारिकी - हितकारिका। अलब्ध: - अप्राप्त:। लब्धपरिरक्षिणी - लब्धस्य रक्षिणी। विवर्धिनी - वृद्धिकारिणी। आयत्ता - आश्रिता। उद्यत: - तत्पर:। उद्वेजनीय: - पीडादायी। परिभूयते - तिरस्क्रियते। अर्ह: - योग्य:, उचितम्। सुविज्ञातम् - सम्यक् प्रकारेण ज्ञातम्। वर्त्मसु - मार्गेषु।

## अभ्यास:

1. **एकपदेन उत्तरत -**

(क) विद्याया: कति प्रकारा: सन्ति ?

(ख) लोकायात्रा कस्याम् आयत्ता ?

(ग) व्यसनेऽभ्युदये च का बुद्धिमवस्थापयति ?

(घ) भूतानाम् उद्वेजनीय: क: ?

(ङ) कीदृश: दण्ड: प्राणभृतां योगक्षेमावह: ?

2. **एकवाक्येन उत्तरत -**

(क) का त्रयी ?

(ख) मनो: मते विद्या: का: ?

(ग) राज्ञा लोक: केन पालित: ?

(घ) अप्रणीत: दण्ड: किं उद्भावयति ?

(ङ) दण्डधराभावे किं भवति ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) कः दण्डः ?

(ख) कानि वेदाङ्गानि ?

(ग) कौटिल्यमते विद्यायां के विषयाः परिगणिताः ?

(घ) आन्वीक्षिकी विद्या कीदृशी ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत -**

(दण्डमूलास्तिस्रो, त्रयीवार्ता, लौकायतं, उद्यतदण्डः, वाणिज्याः, सर्वधर्माणां)

(क) आन्वीक्षिकी ........................ दण्डनीतिश्चेति विद्याः।

(ख) साङ्ख्योगौ ........................... चेत्यान्वीक्षिकी।

(ग) आश्रयः .......................... शश्वदान्वीक्षिकी मता।

(घ) कृषिपाशुपाल्ये ........................... च वार्ता।

(ङ) लोकयात्रार्थी नित्यम् .......................... स्यात्।

(च) तस्मात् ............................. विद्याः।

5. **युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | दण्डानां नीतिः | वाणिज्या च वार्ता |
| (ख) | तस्माल्लोकयात्रार्थी | नित्यमुद्यतदण्डः स्यात् |
| (ग) | चतस्र एव विद्याः | दण्डनीतिः |
| (घ) | कृषिपाशुपाल्ये | कौटिल्यः |

6. **शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत -**

(क) दण्डधराभावे बलीयानबलं न ग्रसते। ☐

(ख) अप्रणीते हि मात्स्यन्यायमुद्भावयति। ☐

(ग) साङ्ख्यं योगो लौकायतं चेत्यान्वीक्षिकी। ☐

(घ) विनयमूलो दण्डः प्राणभृतां न योगक्षेमावहः। ☐

(ङ) त्रयी वार्ता दण्डनीतिश्चेति मानवाः। ☐

7. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) स्थापयति | | | | |
| (ख) स्यात् | | | | |
| (ग) ग्रसते | | | | |
| (घ) योजयति | | | | |
| (ङ) अस्ति | | | | |

8. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) धर्माधर्मौ

(ख) सर्वविद्यानामुपायः

(ग) शश्वदान्वीक्षिकी

(घ) दण्डनीतिश्चेति

(ङ) लोकस्योपकरोति

(च) प्रदानादौपकारिणी

(छ) तस्यामायता

(ज) नेति

9. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

(क) लोकयात्रा

(ख) दण्डनीतिः

(ग) तीक्ष्णदण्डः

10. **अधोलिखितानाम् अव्यानां वाक्यप्रयोगं कुरुत –**

(क) च

(ख) इति

(ग) यथा

(घ) हि

## योग्यताविस्तारः –

- चाणक्यस्य अन्याः रचनाः पठत।
- विष्णुगुप्तस्य आदर्शगुणान् लिखत।